स्नु रिवाचिरप्रभा” भट्टिः। २शाश्वते भरतः। ३वृक्षे श्रीधरः

**स्थित** त्रि० स्था–क्त। १ऊर्द्धस्थतया दण्डायमाने “स्थितायां स्थानमाचरेः” रघुः। २निश्चले ३प्रतिज्ञायुक्ते मेदि०। ४स्थितिशालिनि च।

**स्थिति** स्त्री स्था–क्तिन्। १मर्य्यादायां मेदि० २न्याय्यपथाव-स्थाने अमरः। ३स्थाने च। स्थानभेदे स्थितिनिषेधो यथा “नास्थिभस्मकपालानि न केशान् वा कथञ्चन। तुषा-ङ्गारकविष्ठाद्यं नाधितिष्ठेत् कदाचन” कौर्मपु०१५ अ०।

**स्थितिस्थापक** स्थितिं स्थापयति स्था–णिच्–पुक् ण्वुल्। न्यायोक्ते संस्कारविशेषे “संस्कारभेदो वेगोऽथ स्थिति-स्थापकभावने” “स्थितिस्थापकसंस्कारः क्षितौ केचिच्च-तुर्ष्वपि। अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम्” भाषाप०।

तल्लक्षणं पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वम्। संस्कारत्वस्याजातित्वे तु तद्व्याप्यधर्म्मवत्त्वम्। तथा च पूर्वसंयोगजनितसंयोगनाशकत्वे सति पूर्वसंयोगजातीय-संयोगजनकत्वं तत्त्वम्। स च क्रियाविशेषजन्यः क्रिया विशेषजनकः स्वजन्यक्रियानाश्यो गुणविशेषः। अन्य-थाकृतस्य पुनस्तदवस्थतया स्थापकः गुणविशेष इत्यन्ये। यथाऽऽकृष्टशाखादीनां त्यागे पुनस्तथावस्थिततया स्थापकः। स च अतीन्द्रियः।

**स्थिर** पु० स्था–किरच्। १पर्वते २देवे ३वृक्षे ४कार्त्तिकेये शब्दर०। ५शनौ ६मोक्षे मेदि०। ७वृषे राजनि०। ८धवबृक्षे भावप्र०। ज्योतिषोक्तेषु ९वृषसिंहवृश्चिककुम्भराशिषु च। १०कठिने ११निश्चले च त्रि०। १२शाल्मलौ स्त्री शब्दच० एवं १३काकोल्यां जटा०१४पृथिव्यां १५शालपर्ण्याञ्च स्त्री अमरः। पृथिव्याः स्थिरत्वं मतभेदेन अचलशब्दे ८२पृ० दर्शितम्। स्थिरतया वर्ण्याः पदार्थाः कविकल्प० उक्ता यथा युद्धे प्रधानभटः साध्वीयनः सज्जनमनः। धर्म्माधर्म्मौ मनः भोगा सम्पादनभावे तयोर्बहुकालस्थितत्वात् स्थिरत्वम्।

**स्थिरगन्ध** पु० स्थिरो गन्धो यस्य। १चम्पकवृक्षे २पाटलायां ३केतक्याञ्च स्त्री राजनि०।४स्थिरगन्धयुक्ते द्रव्यमात्रे त्रि०

**स्थिरच्छद** पु० स्थिरश्छदो यस्य। भूर्जपत्रवृक्षे रत्नमा०।

**स्थिरच्छाय** पु० स्थिरानियताच्छाया यस्य। १वृक्षमात्रे शब्दमा० २छायाप्रधाने वटादौ त्रिका०।

**स्थिरजिह्व** पु०स्थिरा अचञ्चला जिह्वा यस्य। मत्स्ये हेमच०।

**स्थिरजीविता** स्त्री स्थिरं जीवितमायुष्यं यस्याः। १शाल्मलीवृक्षे शब्दर०। २चिरजीवने त्रि०।

**स्थिरतर** त्रि० अतिशयेन स्थिरः तरप्। १अत्यन्तस्थिरे अमरः २ईश्वरे पु०।

**स्थिरदंष्ट्र** पुंस्त्री० स्थिरा दंष्ट्रा यस्य। १सर्पे स्त्रियां ङीष् २वराहाकृतिविष्णौ पु० मेदि० ३ध्वनौ अजयः।

**स्थिरपत्र** पु० स्थिराणि पत्राण्यस्य। हिन्ताले राजनि०।

**स्थिरपुष्प** पु० स्थिरं पुष्पमस्य। १चम्पकवृक्षे २वकुलवृक्षे च राजनि०। [कवृक्षे राजनि०।

**स्थिरपुष्पिन्** पु० स्थिरं पुष्पमस्त्यस्य बाहुल्येन इनि। तिल-

**स्थिरमति** स्त्री स्थिरा–मतिः। १स्थिरबुद्धौ स्थिरा मतिर्यस्य। २स्थिरबुद्धियुक्ते त्रि०। “अनिकेतः स्थिरमतिः” गीता।

**स्थिरयौवन** न०पु० स्थिरं यौवनमस्य। १विद्याधरादौ देव-योनिभेदे त्रिका० २चिरस्थायियौवनयुक्ते त्रि०।

**स्थिररङ्गा** स्त्री स्थिरो रङ्गो रागो यस्याः। नील्याम् राजनि०। [द्रायाम् राजनि०। २निश्चलरागयुते त्रि०।

**स्थिररागा** स्त्री स्थिरो रागो रञ्जनं यस्याः। १दारुहरि-

**स्थिरसाधनक** पु० स्थिरं साधयति ल्यु ततः स्वार्थे क। सिन्दुवारवृक्षे राजनि०।

**स्थिरसार** पु०स्थिरः सारो यस्य। (सेगुण) शाकवृक्षे राजनि०

**स्थिराङ्घ्रिप** पु० कर्म०। हिन्तालवृक्षे राजनि०।

**स्थिरायुस्** पु० स्थिरमायुर्यस्य। १शाल्मलिवृक्षे अमरः दीर्घ-कालस्थायित्वात्तस्य तथात्वम्। २चिरजीविनि त्रि०।

**स्थुड** वरणे तुदा० कुटा० पर० सक० सेट्। स्थुडति अस्थु-डीत् तुस्थोड। षोपदेश एव न्याय्यः।

**स्थूणा** स्त्री स्था–नक् ऊदन्तादेशः पृषो०। (खुँटी) १गृहस्तम्भे “स्थूणावशेषं गृहम्” साहि० २लौहप्रतिमायाञ्च अमरः

**स्थूणानिखननन्याय** पु०न्यायशब्दोक्ते ४१७ पृ०न्यायभेदे।

**स्थूर** पु० स्था–ऊरन् किच्च। १वृषे संक्षिप्तसा०। २मनुष्ये सि० कौ०।

**स्थूरिन्** पु० स्था–ऊरन् किच्च स्थूरो वृषादिभारवाहकः स्थूरोऽस्त्यस्य सादृश्येन इनि। वृषादिवत्पृष्ठेन भार-वाहकेऽश्वे खरे च स्थूरस्य भावः अण् स्थौरं तदस्यास्ति इनि स्थौरीत्यप्यत्र अमरः।

**स्थूल** वृंहणे अद० चु० उभ० अक० सेट्। स्थूलयति–ते अतुस्थूलत्–त। बहुचकत्वान्न षोपदेशः।

**स्थूल** त्रि० स्थूल–अच्। १पीवरे (मोटा) अमरः २कूटे ३ज-डे च न० मेदि०। ४पनसे पु० राजनि०। ५गजपि-प्पल्याम् स्त्री शब्दच०। एवं ६एर्वारौ राजनि०। ७वृहदेलायाञ्च रत्नमा० स्वार्थे क। पीवरे त्रि०।